विद्युद्दूतः | विद्भू | vidyud-dūtaḥ

क्रमाङ्कः चतुर्थः | वसुधैव कुटुम्बकम् | Issue: Fourth

INTERNATIONAL ASSOCIATION of SANSKRIT STUDIES

१/१/२०१३ | अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः | 1/1/2013

### *मातः! संस्कृतवाणि!*

कल्याणान्यकरोरलौकिकसुखप्राप्त्यैकहेतूः श्रुतीः
दत्त्वास्मभ्यमिहैहिकं ननु सुखं संवर्ध्य तन्मूलकम्।
कृत्वास्मान् पृथिवीतलेऽग्रपुरुषान् ज्ञानेन वृद्धान् गुरून्
मातः! संस्कृतवाणि! ते चरणयोः स्तान्नः प्रणामाञ्जलिः ॥ १ ॥

कल्याणान्यकरोर्महातिशयसद्वृत्तं महापूरुषं
मर्यादापुरुषोत्तमं रघुपतिं योगीश्वरं केशवम्।
दत्त्वास्मभ्यमशिक्षयः सुविशदं योगं च साङ्ख्यं महत्
मातः! संस्कृतवाणि! ते चरणयोः स्तान्नः प्रणामाञ्जलिः ॥ २ ॥

कल्याणान्यकरोरचिन्त्यरचनाचातुर्यधुर्यं सुधा-
निष्यन्दिप्रतिभाविलासवचनं श्रीकालिदासं गुरुम्।
दत्त्वास्मभ्यमिह त्रिकालरुचिरं वाग्रूपमालेख्यकं
मातः! संस्कृतवाणि! ते चरणयोः स्तान्नः प्रणामाञ्जलिः ॥ ३ ॥

कल्याणान्यकरोश्शमादिमहितैर्मन्वादिभिर्बोधितान्
योगक्षेमकरान् समाजहितदान् धर्मान् सुयोग्यान् शुभान्।
दत्त्वास्मभ्यमशिक्षयः सुचरितं शस्यं महीमण्डले
मातः! संस्कृतवाणि! ते चरणयोः स्तान्नः प्रणामाञ्जलिः ॥ ४ ॥

कल्याणान्यकरोस्सुदुर्गमहारण्यप्रभे वाग्वने
वेदाख्ये स्ववगाहनाय शतशो न्यायाख्यमार्गान् पटून्।
दत्त्वास्मान् जगति प्रपूजितवचोवैचारिकांश्चाकरोः
मातः! संस्कृतवाणि! ते चरणयोः स्तान्नः प्रणामाञ्जलिः ॥ ५ ॥

वेम्पटि कुटुम्ब शास्त्री

---

दिवाकराचार्येण विरचितानि पद्यानि

***कौतुकं कामना च***

एका चित्रपदक्रमा चकितदृक् कल्याणसम्पादिनी
श्लाघ्यासीन्मिलितैकदा पथि क्वचित्स्वप्ने नु साक्षाद्दिवा ।
सख्यं हृद्यमुपेत्य यच्चपलया वक्ष्ये कृतं कौतुकं
धन्यानां विदुषां विनोदनधिया शार्दूलविक्रीडितम् ।। १।।

आसीन्मेदुरमम्बरं पवनजं शैत्यं च किंचित्स्थितं
यद्वा स्याद् भ्रमणं भविष्यति नदीतीरे ऽस्ति रम्यं स्थलम् ।
उक्त्वैवं स्मितपावना सुचतुरा संदर्श्य चित्रं स्थलम्
नद्याः पूर्वतटेन यापितवती माया-सखी स्वेप्सितम् ।। २।।

संलप्याथ च तत्र वल्गुवचसा हृष्टाब्रवीन्मां मुदा
को यायात्पुनरेव तेन हि पथा येनागतो ऽत्राञ्जसा ।
विश्वस्तानुगता ततो ऽपरतटाद्गेहं नयामीति सा
मुग्धं मामनयज्जलात्तरणिना पंकाबिलं शाद्वलम् ।। ३।।

तन्मध्ये रुदती नु हासरसिका कीटच्छलेन द्रुतं
नृत्यन्ती स्वयमेव नर्तितवती मां गुल्फदघ्ने जले ।
भ्रान्त्वैवं दिवसावसानसमये यानं समाहूय हा!
क्षिप्त्वा मां पथि कर्दमाक्तमपटुं सान्तर्हिता कुत्रचित् ।। ४।।

बालयोग्यैः सहृदयान् सज्जनांश्च विनोदयन् । मातरं ललितां वाचं रुक्षैः शब्दैः समर्चयन् ।। ५।।
अग्निचन्द्रखनासत्यलक्षिता नूतना शरत् । दिवाकरः कामयते नः सुखाय भवेदिति ।। ६।।

स्वाध्याये च निरन्तरप्रवचने सद्यः सदा तत्पराः
ये ये संस्कृतवाङ्मयप्रवणताचर्याव्रते दीक्षिताः ।
शास्त्रार्थोपनिषन्निषण्णधिषणास्तत्त्वार्थपर्येषणे
सोत्कास्ते व्यवहारतो विजयिनश्छात्राब्जबोधोज्ज्वलाः ।। ७।।

---

पुण्यापुण्यफलोच्चयं करधृते कारण्डके संवहन्  योगक्षेमकरो नितान्तसुखकृन्माङ्गल्यसंधायकः ।
सर्वेशस्य कृपां कटाक्षततिभिः प्रासारयन्नागतो  भूयान्नूतनवत्सरो जनिमतां हर्षप्रदो नश्चिरम् ॥

हर्षोल्लासप्रदे नववत्सर(२०१३)शुभागमसन्दर्भे ऽन्ताराष्ट्रियसंस्कृताध्ययनसमवायपक्षतः सन्तु शुभाशयाः।

इति समवायस्य प्रथमसेवकः

वेम्पटि कुटुम्ब शास्त्री

विद्युद्दूतस्य चतुर्थाङ्कः समाप्तः